# .. Shri Jayaskandastotram ..

# ॥ श्रीजयस्कन्दस्तोत्रम् ॥

## Sanskrit Document Information

Text title : jayaskandastotram

File name : jayaskandastotram.itx

Location : doc_subrahmanya

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail.com, PSA Easwaran

Description-comments : Subrahmanya Stuti Manjari, Mahaperiaval Trust

Acknowledge-Permission: Mahaperiaval Trust

Latest update : January 3, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

January 3, 2017

*sanskritdocuments.org*

# ॥ श्रीजयस्कन्दस्तोत्रम् ॥

ॐ श्रीगणेशाय नमः ।

॥ श्रीः ॥

जय देवेन्द्रजाकान्त जय मृत्युञ्जयात्मज ।
जय शैलेन्द्रजासूनो जय शम्भुगणावृत ॥ १॥

जय तारकदर्पघ्न जय विघ्नेश्वरानुज ।
जय देवेन्द्र-जामातः जय पङ्कजलोचन ॥ २॥

जय शङ्करसम्भूत जय पद्मासनार्चित ।
जय दाक्षायणीसूनो जय काशवनोद्भव ॥ ३॥

जय भागीरथीसूनो जय पावकसम्भव ।
जय पद्मजगर्वघ्न जय वैकुण्ठपूजित ॥ ४॥

जय भक्तेष्टवरद जय भक्तार्तिभञ्जन ।
जय भक्तपराधीन जय भक्तप्रपूजित ॥ ५॥

जय धर्मवतां श्रेष्ठ जय दारिद्र्यनाशन ।
जय बुद्धिमतां श्रेष्ठ जय नारदसन्नुत ॥ ६॥

जय भोगीश्वराधीश जय तुम्बुरुसेवित ।
जय षट्तारकाराध्य जय वल्लीमनोहर ॥ ७॥

जय योगसमाराध्य जय सुन्दरविग्रह ।
जय सौन्दर्यकूपार जय वासववन्दित ॥ ८॥

जय षड्भावरहित जय वेदविदां वर ।
जय षण्मुखदेवेश जय भो विजयी भव ॥ ९॥

ॐ श्रीवल्लीदेवसेनासमेत श्रीसुब्रह्मण्याय नमः ।

इति श्रीजयस्कन्दस्तोत्रम् सम्पूर्णम् ।

Proofread by Sivakumar Thyagarajan shivakumar24 at gmail.com, PSA Easwaran

.. Shri Jayaskandastotram ..
was typeset using XƎLaTeX 0.99996
on January 3, 2017

Please send corrections to *sanskrit@cheerful.com*